ॐ गं महागणाधिपतये नमः। ॐ ऐं महासरस्वत्यै नमः। ॐ श्रीं महालक्ष्म्यै नमः। ॐ सर्वेभ्यो देवेभ्यो नमः। ॐ सर्वाभ्यो देवीभ्यश्च नमः। ॐ सर्वेभ्यो गुरुभ्यो नमः। ॐ श्री हरिहरतीर्थाय नमः। ॐ श्री रामानन्दसरस्वत्यै नमः। ॐ श्री सत्यानन्दगुरवे नमः। ॐ श्री शिवानन्दपरमगुरवे नमः। ॐ श्रीजगद्गुर्वाद्य शंकराचार्याय नमः। ॐ भूर्भुवःस्वः श्रीमेधाशक्त्यै नमः। अथ मेधासूक्तं। हरिः ॐ।

ॐ शान्तिः शान्तिः शान्तिः। हरिः ॐ तत्सत्। ॐ भूर्भुवःस्वः श्रीमेधाशक्त्यै नमः।

## अथ प्रातः स्मरणस्तोत्रम्:-

प्रातः स्मरामि हृदि संस्फुरदात्मतत्त्वं
सच्चित्सुखं परमहंसगतिं तुरीयं।
यः स्वप्नजागरसुषुप्तमवैति नित्यं
तद्ब्रह्मनिष्कलमहं न च भूतसंघः।।१।।
प्रातर्भजामि मनसा वचसामगम्यं
वाचो विभान्ति निखिला यदनुग्रहेण।
यं नेति नेति वचनैर्निगमा अवोचंस
तं देवदेवमजमच्युतमाहुरग्र्यम्।।२।।
प्रातर्नमामि तमसः परमर्कवर्णं
पूर्णं सनातनपदं पुरुषोत्तमाख्यम्।
यस्मिन्निदं जगदशेषमशेषमूर्तौ
रज्ज्वां भुजंगम इव प्रतिभासितं वै।।३।।
श्लोकत्रयमिदं पुण्यं लोकत्रयविभूषिण्म्।
प्रातः काले पठेद्यस्तु स गच्छेत्परमं पदं।।४।।
सिन्धूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्,
तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहां।
पाणिभ्यामलिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं,
सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत्परमम्बिकां।।
देहि देवि परं ज्ञानं, देहि देवि परं सुखं।
धनं देहि यशो देहि, कामं मोक्षं च देहि मे।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

ध्येय: सदा सवितृमण्डलमध्यवर्ती, नारायण सरसिजासनसन्निविष्टं।
केयूर–मकर–कुण्डल–हारकिरीटी, हरिहिरण्मयवपु: धृतशंखचक्र:।।

।। ॐ भूर्भुव:स्व: श्रीमहालक्ष्म्यै नम:।। अथ श्रीसूक्तम्।।

या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गम्भीरावर्तनाभिस्तनभरनमिता शुभ्रवस्त्रोत्तरीया।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितै: स्नापिता हेमकुंभै
र्नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमांगल्ययुक्ता।।
अरुणकमलसंस्थां तद्रज:पुंजवर्णां
करकमलधृतेष्टाभीयुग्माम्भुजा च।
मणिकटकविचित्राऽलंकृता कल्पजालै:
सकलभुवनमाता संततं श्री: श्रियैर्न:।।

।। ॐ भूर्भुव:स्व: श्रीमहालक्ष्म्यै नम:।। हरि: ॐ तत्सत्।।
।। ॐ शान्ति: शान्ति: शान्ति:।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM